# SANSKRIT

## Second Paper (काव्यम् अर्थावबोधः व्याकरणं निबन्धश्च)

Time Allowed : Three Hours　　　　Maximum Marks : 100

1. अधोलिखितेषु श्लोकेषु कयोश्चिद् द्वयोः सान्वयसन्दर्भ प्रसङ्गैः व्याख्या विधेया- 6×2

(क) यस्य कृत्यं न जानन्ति मन्त्रं वा मन्त्रितं परे।
कृतमेवास्य जानन्ति स वै पण्डित उच्यते।।

अथवा

एक विषरसो हन्ति शस्त्रेणैकश्च वध्यते।
सराष्ट्रं सप्रजं हन्ति राजानं मन्त्रविप्लवः।।

(ख) न राज्यं प्राप्तमित्येव वर्तितव्यमसाम्प्रतम्।
श्रियं ह्यविनयो हन्ति जरा रूपमिवोत्तमम्।।

अथवा

गन्धेन गावः पश्यन्ति वेदैः पश्यन्ति ब्राह्मणाः।।
चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः।।

2. अधोलिखितेषु प्रश्नेषु केषाञ्चित् चतुर्णां प्रश्नानामुत्तरं देयम्- 4×2

(क) महाभारतस्य कस्मिन् पर्वणि विदुरनीतिः वर्णिता?

(ख) स्वर्गस्य सोपानं किमस्ति?

(ग) लोके वशीकृतिः काऽस्ति?

http://questionpaperesult.com

Scanned by CamScanner

(घ) कौ द्वौ स्वर्गस्योपरि तिष्ठतः?

(ङ) त्रिविधं नरकस्य द्वारं किम्?

(च) कस्य प्रज्ञा स्रवति?

(छ) अजातशत्रुः कस्य नाम आसीत्?

(ज) राज्ञाम् के बान्धवाः?

3. निम्नलिखितेषु श्लोकेषु कयोश्चिद् द्वयोः श्लोकयोः व्याख्या सन्दर्भसहिता करणीया- 6×2

(क) तथापि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन् भूतिमनार्यसंगमाद्
वरं विरोधोऽपि समं महात्मभिः।।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः।।

(ख) न तेन सज्यं क्वचिदुद्यतं धनुः
कृतं न वा कोपविजिह्ममाननम्।
गुणानुरागेण शिरोभिरूह्यते
नराधिपैर्माल्यमिवास्य शासनम्।।

(ग) व्रजन्ति ते मूढधियः पराभवं
भवन्ति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नन्ति शठास्तथाविधा-
नसंवृताङ्गान्निशिता इवेषवः।।

(घ) द्विषन्निमित्ता यदियं दशा ततः
समूलमुन्मूलयतीव मे मनः।
परैरपर्यासितवीर्यसम्पदां
पराभवोऽप्युत्सव एव मानिनाम्।।

4. निम्नलिखितेषु प्रश्नेषु केषाञ्चित चतुर्णां प्रश्नानामुत्तरं देयम्- 4×2

(क) 'किरातार्जुनीयम्' इति महाकाव्यस्य कथायाः मूलस्त्रोतः किमस्ति?

(ख) कीदृशं वचः दुर्लभं भवति

(ग) दुर्योधनस्य सत्क्रिया केन विना न प्रवर्तते?

(घ) नताननः कः व्यथते?

(ङ) शमेन सिद्धि के व्रजन्ति?

(च) भारवेः काव्यस्य का विशेषता संस्कृत-साहित्ये प्रसिद्धा अस्ति?

(छ) 'किरातार्जुनीयम्' महाकाव्यस्य प्रथमसर्गे कतमः छन्दः प्रयुक्तः?

(ज) 'अहो दुरन्ता बलवद्विरोधिता' सूक्तेः को ऽर्थः?

5. अधोलिखितेषु श्लोकेषु कयोश्चिद् द्वयोः सान्वयसन्दर्भ प्रसंगैः व्याख्या करणीया- 6×2

(क) अम्भोजिनीवनविहारविलासमेव
हंसस्य हन्ति नितरां कुपितो विधाता।
न त्वस्य दुग्धजल भेदविधौ प्रसिद्धां
वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः।।

http://questionpaperesult.com

Scanned by CamScanner

(ख) लाङ्गूलचालनमधश्चरणावपातं
भूमौ निपत्य वदनोदरदर्शनं च।
श्वा पिण्डदस्य कुरूते गजपुङ्गवस्तु
धीरं विलोकयति चाटुशतैश्च भुङ्क्ते।।

(ग) मौनान्मूकः प्रवचन पटुर्वातुलो जल्पको वा
धृष्टः पार्श्वेवसति च सदा दूरतश्चाप्रगल्भः।
क्षान्त्या भीरूर्यदि न सहते प्रायशो नाभिजातः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः।।

(घ) निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः।।

6. अधस्तनेषु प्रश्नेषु केषाञ्चित् चतुर्णां प्रश्नानामुत्तरं देयम्- 4×2

(क) भर्तृहरिणा कति शतकानि रचितानि? नामानि लिखन्तु।

(ख) विधात्रा अज्ञतायाः छादनं किं विनिर्मितम्?

(ग) विवेकभ्रष्टानां विनिपातः कथं भवति?

(घ) कस्य शास्त्रविहितं औषधं नास्ति?

(ङ) केषां जरामरणजं भयं नास्ति?

(च) का राजसु पूज्यते?

(छ) वाराङ्गना इव अनेकरूपा का वर्तते?

(ज) करूणापराणां कायः कैः विभाति?

7. अधोलिखितेषु विषयेषु कमप्येकं विषयमधिकृत्य संस्कृत भाषायां निबन्धो लेखनीय-10

(क) वर्तमानयुगे संस्कृतभाषायाः महत्त्वम्।

(ख) आधुनिकी शिक्षा-पद्धतिः।

(ग) दूरदर्शनस्योपयोगिता, प्रभावश्च।

(घ) वर्तमान-भारते भ्रष्टाचारः।

8. निम्नलिखित गद्यांशं पठित्वा देय-प्रश्नानामुत्तरं लेखनीयम्-

आचारस्य तात्पर्यम् आचरणेन अस्ति। सतां सज्जनानाम् आचार सद्व्यवहारः सदाचारः इत्युच्यते। सज्जनाः विद्वांसो यथा आचरन्ति तथैव आचरणं सदाचारी भवति। सज्जनाः स्वकीयानि इन्द्रियाणि वशे कृत्वा सर्वैः सह शिष्टतापूर्वकं व्यवहार कुर्वन्ति। ते सत्यं वदन्ति, असत्यभाषणाद् विरमन्ति, मातुः पितुः, गुरूजनानां, वृद्धानां, ज्येष्ठानां व आदरं कुर्वन्ति। तेषाम् आज्ञां पालयन्ति। सत्कर्मणि प्रवृत्ताः भवन्ति असत्कर्मभ्यश्च निवृत्ताः भवन्ति। तद्वद् आचरणेन मनुष्यः सदाचारी, धार्मिकः, शिष्टो, विनीतो, बुद्धिमान् च जायते। आचारः परमो धर्मः इति आभाणके धर्मशब्दस्य अपि सत्ता अस्ति। मानवजीवने धर्मस्य अतीव महत्त्व विद्यते। पुरूषार्थस्य उत्कर्षः अपकर्षो वा धर्मेण एव जायते। रक्षितः धर्मः मनुष्यं रक्षति अरक्षितश्च धर्मः मानवं हन्ति। अतएव मनुः कथयति-
''धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।'' द्विविधः खलु धर्मः प्रवृत्तिलक्षणः निवृत्तिलक्षणश्च। उभयस्यापि मूलं सदाचारः अस्ति। अतएव आचारप्रभवो धर्मः इति

http://questionpaperesult.com

Scanned by CamScanner

शास्त्रैः कथितम्।

(अ) उपर्युक्त-गद्यांशस्य शीर्षकं देयम्। 2

(आ) अधोलिखितानाम् उत्तराणि देयानि-

1. कः सदाचारः उच्यते?
2. सज्जनाः कथं व्यवहरन्ति?
3. सज्जनाः कस्मिन् प्रवृत्ताः केभ्यश्चनिवृत्ताः भवन्ति?
4. पुरूषार्थस्य उत्कर्षः केन जायते?
5. धर्मस्य मूलं किम् अस्ति? 5×1

(इ) उपर्युक्त-गद्यांशस्य स्वसंस्कृतगिरा संक्षिप्तीकरणं क्रियताम्। 2+2½

9. अधोलिखितेषु सूत्रेषु कयोश्चिद् द्वयोः सूत्रयोः सोदाहरणं व्याख्या कार्या-

(i) शेषात् कर्त्तरि परस्मैपदम्। (ii) लोटो लँङ्वत्।

(iii) टित् आत्मनेपदानां टेरे। (iv) क्रयादिभ्यः श्ना।

10. अधस्तनेषु पदेषु केषाञ्चित् पञ्चपदानां सूत्रोल्लेखपूर्वकं सिद्धिः कार्या- 5×3

(i) भविष्यति (ii) भवन्तु (iii) एधसे

(iv) आदत् (v) जुह्वति (vi) दीव्यति

(vii) सुनुतः (viii) तन्वन्ति (ix) तोत्स्यामः

(x) चोरयेयुः

http://questionpaperesult.com

Scanned by CamScanner